22

म१:४१
९३८

शि. प्र. मंडळी, पुणे ९.
मीमांसा विद्यालय
卐 ग्रंथालय 卐
ग्रंथ नाव भोजनविधी
लेखक

( वाजेसनीयशाखेचे ब्राह्मणांकरितां. )

# अथभोजनविधीप्रारंभः

९६८

श्रीगणेशायनमः॥ ॥अथभोजनम्॥ ॥पाणिपादौप्रक्षाल्याचम्य॥श्रीपर्णीदार्वादि-
निर्मितेपीठेप्राङ्मुखःप्रत्यङ्मुखोवाउपविश्यभूमिंप्रोक्ष्यचतुरस्रंमंडलंकृत्वातदुपरिरंभाम-
ध्वाम्रजंबूपनसचंपकपद्मोदुंबरपालाशपात्राणामध्येअन्यतमंपत्रंनिधाय॥भोजनाय
ब्राह्मणश्रेष्ठंपीठेउपवेशयित्वा॥ब्राह्मणपूजनम्॥आचम्य॥अद्यपूर्वो॰ असुकदेवता-
प्रीत्यर्थंब्राह्मणसुवासिनीसमाराधनंकरिष्ये॥तत्रादौब्राह्मणपूजनंकरिष्ये॥अर्घ्य-
स्थानेसंकल्पः॥इतिवचनम्॥अस्तुसंकल्पसिद्धिः॥इतिप्रतिवचनम्॥एवमग्रेपि॥इद-
मर्घ्यम्॥स्वार्घ्यम्॥इदमाचमनीयम्॥स्वाचमनीयम्॥गंधाःपांतु॥सौमंगल्यंचा-
स्तु॥अक्षताःपांतुआयुष्यमस्तु॥पुष्पाणिपांतुसौश्रेयसमस्तु॥तांबूलंपातु॥ऐश्व- १
र्यमस्तु॥दक्षिणाःपांतु॥बहुधनमस्तु॥सकलाराधनेष्वर्चितमस्तु॥अस्तुस्वर्चितम्

॥नमोस्त्वनंतायसहस्रमूर्तयेसहस्रपादाक्षशिरोरुबाहवे॥सहस्रनाम्नेपुरुषायशा
श्वतेसहस्रकोटीयुगधारिणेनमः॥इतिब्राह्मणपूजनम्॥ ॥अथपरिवेषणम्॥पा
त्रमध्येअन्नंवामेभक्ष्यभोज्यंदक्षिणेघृतपायसंपुरतःशाकादीन्॥एवंपरिवेषणंका
रयित्वा॥ब्राह्मणभोजनसंकल्पः॥गायत्रीमंत्रेणप्रोक्ष्य॥नानापात्रस्थमन्नंतस्मैतस्मै
संप्रददे॥ॐप्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरितावभूव॥यत्कामास्तेजुहुमस्त
न्नोअस्तुवयंस्यामपतयोरयीणाम्॥१॥एकोविष्णुर्महद्भूतंपृथग्भूतान्यनेकशः॥त्री
न्लोकान्व्याप्यभूतात्माभुंक्तेविश्वभुगव्ययः॥अनेनब्राह्मणभोजनेनअमुकदेवताप्री
यतांनमम॥नमोदेव्यैमहादेव्यैशिवायैसततंनमः॥नमःप्रकृत्यैभद्रायैनियताःप्रण-
ताःस्मताम्॥१॥अनेनसुवासिनीभोजनेनअमुकदेवीप्रीयतांनमम॥तत्सद्ब्रह्मार्पणम

तीर्थ· रुक्॥ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः॥ प्रप्रदातारंतारिषऊर्ज्जन्नोदेहिद्विपदेचतु गंध·सं·
२ ष्पदे॥ पार्वतीपतेहरहरमहादेव॥ ॥अथापोशनम्॥ प्रांजलिः अन्नंप्रणम्यास्माकंनि-
त्यमेत्यतदरुक्॥ इतिसंप्रार्थ्य॥ ॐ पितुंनुस्तोषंमहोधर्माणंतविषीम्॥ यस्यत्रितोव्यो
जसावृत्रंविपर्वमर्दयत्॥१॥ इतिमंत्रेणस्तुत्वा॥ मानस्तोकेतनयेमानआयुषिमानोगोषु
मानोअश्वेषुरीरिषः॥ मानोवीरान्रुद्रभामिनोवधीर्हविष्मंतः सदमित्त्वाहवामहे॥१॥ ॐ
नमोवः किरिकेभ्योदेवानांहृदयेभ्योनमोविचिन्वत्केभ्योनमोविक्षणत्केभ्योनमआनि
र्हतेभ्यः॥१॥ ॐ नमः शंभवायचमयोभवायचनमः शंकरायचमयस्करायचनमः शिवा-
यचशिवतरायच॥१॥ इत्यभिमंत्रितोदकेनान्नंप्रोक्ष्य॥ सत्यंत्वर्तेनपरिषिंचामि॥ इ- २
तिदिवा॥ रात्रौतु॥ ऋतंत्वासत्येनपरिषिंचामि॥ इतिप्रदक्षिणमन्नंपरिषिच्य॥ दक्षि-

णतोभुविउदकधारांप्राक्संस्थां कृत्वा तत्रबलित्रयं दद्यात् ॥ तद्यथा ॥ ॐ भूतयेस्वाहा
नमः ॥ ॐ भुवनपतयेस्वाहानमः ॥ ॐ भूतानांपतयेस्वाहानमः ॥ एवंबलित्रयंप्राक्सं
स्थंदत्वाउपर्युदकंदत्वाबलीनउद्धृत्यहस्तंप्रक्षाल्यआपोशनार्थंजलमादायवामहस्तम-
ध्यमानामिकांगुष्ठैर्भोजनपात्रमालभ्य ॥ अन्नंब्रह्मारसोविष्णुर्भोक्तादेवोमहेश्वरः ॥ ए
वंध्यात्वातुयोभुंक्ते सोन्नदोषैर्नलिप्यते ॥ १ ॥ अंतश्चरतिभूतेषुगुहायांविश्वतोमुखः
॥ त्वंयज्ञस्त्वं वषट्कारस्त्वंरुद्रस्त्वं प्रजापतिस्त्वंविष्णोः परमंपदममृतोपस्तरणमसि-
स्वाहा ॥ इतिमंत्रेणनिःशब्दं तज्जलस्याचमनम् ॥ तर्जनीमध्यमांगुष्ठैः ॥ ॐ प्राणाय-
स्वाहाइदंप्राणायनमम ॥ मध्यमानामिकांगुष्ठैः ॥ ॐ अपानायस्वाहाइदं ॥ कनिष्ठिका
नामिकांगुष्ठैः ॥ ॐ व्यानायस्वाहाइदं ॥ मध्यमानामिकांगुष्ठैः ॥ ॐ उदानायस्वाहाइदं ॥

आ॰श॰ सर्वाभिः ॥ ॐ समानायस्वाहाइदंस० ॥ जलंस्पृष्ट्वायथेष्टंभोजनंकुर्यात् ॥ ततोभोज-
३ नांतेपात्रस्थमन्नंकिंचिद्गृहीत्वाअवघ्राय ॥ उच्छिष्टभागधेयेभ्योनमः ॥ इतिभूमौवि-
सृज्य ॥ उत्तरापोशनार्थंउदकंगृहीत्वा ॥ अमृतोपिधानमसिस्वाहा ॥ इतिमंत्रेणतदर्धं
पीत्वा ॥ रौरवेपुण्यनिलयेपद्मार्बुदनिवासिनाम् ॥ अर्थिनामुदकंदत्तमक्षय्यमुपतिष्ठ
तु ॥ इतिमंत्रेणावशिष्टंजलंपितृतीर्थेनभूमौनिषिच्यअंगणादौपाणिमुखेसंशोधये-
त् ॥ हस्तौपादौप्रक्षाल्याचम्यशतपदानिगत्वा ॥ अगस्तिरग्निर्वडवानलश्चभुक्तं म-
मान्नंजरयत्यशेषम् ॥ सुखंममैतत्परिणामसंभवंयच्छत्वरोगोममचारुदेहः ॥ १ ॥
इत्युदरंपरिमृज्यतांबूलंभक्षयेत् ॥ इत्यापोशनम् ॥ ॥ समाप्तम् ॥ ॥ ७ ॥ ३

९३८